# संस्कृतवार्ता:

**दिनाङ्क :- 14.02.2025** **सायम् - 06:20**

**मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्र मोदी प्रोक्तवान् यत् भारत-अमरीका-देशौ आतङ्कवादं विरुध्य सङ्घर्षे सुदृढतया उपस्थितौ स्त:।
- थाईलैंडदेशे आयोज्यमानं संवाद इति कार्यक्रमं दृश्य-सम्वाद-माध्यमेन संबोधयन् श्री-मोदी प्रोक्तवान् यत् भारतस्य एक्ट-ईस्ट-नीतिः , थाईलैंडस्य एक्ट-वेस्ट-नीतिः परस्परपूरके स्तः ।
- भारतस्य समग्र-मूल्य-सूचकाङ्के आधारिता मुद्रास्फीति: जनवरीमासे द्वि-दशमलव-त्रीणि एकं प्रतिशतं यावत् स्थापिता।
- नवदशोत्तर-द्विसहस्रतमाब्दे जाते पुल्वामा-आक्रमणे दिवङ्गतान् सैनिकान् अद्य राष्ट्रम् स्मरति।
- क्रिकेट्क्रीडायाम्, महिलाप्रीमीयरलीग-इत्येतस्या: स्पर्धाया: तृतीयं संस्करणम् अद्य समारभते। रॉयल-चैलेंजर्स बैंगलुरूदलं गुजरात-जायन्ट्स्-दलं विरुध्य अद्य सायं स्पर्धिष्यते।

**प्रधानमन्त्री-अमरीका यात्रा**

प्रधानमन्त्री नरेन्द्र मोदी प्रोक्तवान् यत् भारत-अमरीका-देशौ आतङ्कवादं विरुध्य सङ्घर्षे सुदृढतया उपस्थितौ स्त:। सीमापारम् आतङ्कवादं समापयितुं सहमतौ अपि जातौ। अद्य वॉशिंग्टनडीसीनगरे व्हाइटहाउस-इत्यत्र अमरीकीय-राष्ट्रपतिना डोनाल्ड-ट्रम्प-इत्यमुना साकं द्विपक्षीय-वार्ताया: पश्चादेव संयुक्त-वार्ताहर-सम्मेलने प्रधानमन्त्रिणा वक्तव्यमिदं प्रकाशितम्। श्रीमोदिना अग्रे निगदितं यत् भारतामेरिकाराष्ट्रे एकविंशति-शताब्द्याम् एकस्यै रक्षा-सहभागितायै एकस्मिन् नवीने दशवर्षीये प्रारूपे हस्ताक्षरस्य घोषणां कृतवती। प्रारूपमिदं पञ्चत्रिंशदधिक-द्विसहस्रतमवर्ष-पर्यन्तं प्रचलिष्यति। यस्योद्देश्यं उभयो: देशयो: मध्ये रक्षासम्बन्धानां प्रबलीकरणमिति विद्यते। भारतामेरिका-देशौ अतोऽपि त्रिंशदधिक द्विसहस्रतम वर्षं यावत् द्विपक्षीयं व्यापारं द्विगुणं कृत्वा पञ्चशतबिलियनडॉलरमितं यावत् कर्तुं निर्णयं निर्णीतवन्तौ। सञ्जातोपवेशने अमरिकीयराष्ट्रपतिना डोनल्ड-ट्रम्प-इत्यमुना समुदीरितं यत् भारतामरिकादेशौ बृहत्तमेषु व्यावसायिक-मार्गेषु अन्यतमौ स्त:। असौ अमरिकादेशत: भारतदेशाय तैल-प्राकृतिक-वातीयेन्धनस्य प्रमुखापूर्तिकरणस्य उद्देश्येन एकस्य महत्वपूर्णस्य सन्धिपत्रस्य घोषणां कृतवान्। अत्रावधौ विदेशसचिव: विक्रममिस्रीइत्येष: सूचितवान् यत् भारतम् अस्य वर्षस्य समाप्तौ क्वाडशिखरसम्मेलनस्य आतिथ्यं विधास्यति एतदर्थं प्रधानमन्त्री नरेन्द्रमोदी डोनाल्डट्रम्प इत्येतस्मै निमन्त्रणमपि प्रदत्तवान्।

**प्रधानमन्त्री - सम्वाद:**

प्रधानमन्त्री नरेन्द्र-मोदी प्रोक्तवान् यत् भारत-थाईलैंड-देशयोः मध्ये द्विसहस्रवर्षाधिकाः सुदृढ-सांस्कृतिक-संबन्धाः सन्ति । थाईलैंडे आयोज्यमानं संवाद इति कार्यक्रमं दृश्य-सम्वाद-माध्यमेन संबोधयन् श्री-मोदी प्रोक्तवान् यत् भारतस्य एक्ट-ईस्ट-नीतिः , थाईलैंडस्य एक्ट-वेस्ट-नीतिः परस्परपूरके स्तः,याभ्यां परस्पर-प्रगतिः समृद्धिः च वर्धेते । सः प्रोक्तवान् यत् एतत् एशियायाः पारस्परिकीनां दार्शनिकाध्यात्मिक-परंपराणाम् एकं सुंदरम् उदाहरणम् अस्ति। प्रधानमन्त्रिणा प्रोक्तं यत् अनेन सम्मेलनेन प्रकाश्यते यत् एशियायाः शताब्दिसमयः न केवलम् आर्थिकमूल्यानाम् अपितु सामाजिक-मूल्यानां विषये अपि अस्ति । श्रीमोदी सबलं प्रोक्तवान् यत् भगवतः बुद्धस्य शिक्षाः शांतिपूर्णस्य प्रगतिशीलस्य च युगस्य निर्माणे विश्वस्य मार्गदर्शनं कर्तुं शक्नुवन्ति । सः प्रोक्तवान् यत् संघर्षैः अद्य जनाः राष्ट्राणि च अतिक्राम्य प्रकृत्या सह द्वन्द्वः विधीयते । प्रधानमंत्रिणा कथितं यत् अनेन पर्यावरणं संकटापन्नं सञ्जातं यदस्माकं विश्वाय हानिकारकं वर्तते ।

**महाकुम्भ**

सम्प्रति महाकुम्भसम्बद्धाः वार्ता:

**''प्रैष्यविभाग: प्रयागराजे प्रचल्यमाने महाकुम्भमेलापके श्रद्धालुभ्य: विशिष्टा: सेवा: प्रददाति। मेलकक्षेत्रे स्थापितेषु शिविरेषु आधारप्रपत्रस्य नवीनीकरणं अन्येषाञ्च प्रपत्राणां अद्यतनीयकरण-सदृशा: सेवा: तत्र समुपलभ्यन्ते। इत: पूर्वं सञ्चारमन्त्री ज्योतिरादित्य: एम. सिन्धिया इत्यसौ महाकुम्भे त्रिस्र:स्मारक-प्रैष्य-चिटिका: सम्प्रसारितवान्। अनेन प्रयागराजस्य अरैलघट्टे प्रैष्यचिटिकानाम् अनावरणं कृतम्। एतासु प्रैष्यचिटिकासु त्रिवेण्या: तीर्थस्थानस्य त्रीणि प्रमुखानि**

स्थलानि यथा-महर्षि-भारद्वाजाश्रम: स्नानम् अक्षयवटं च समडिकतानि। ऐतिहासिकानि वृत्तानि संस्मरणानि www.epostoffice.gov.in इत्यत्र समुपलब्धानि वर्तन्ते।

**समग्र-मूल्य-सूचकाङ्क:**

भारतस्य समग्र-मूल्य-सूचकाङ्के आधारिता मुद्रास्फीति: जनवरीमासे द्विदशमलव त्रीणि एकं प्रतिशतं यावत् स्थापिता। वाणिज्योद्योगमन्त्रालयेन प्रदत्त-दत्तांशानुसारि गतवर्षे दिसम्बरमासे इदं हि वार्षिकाधारे द्वि दशमलव त्रीणि सप्त प्रतिशतं यावत् आसीत्। प्राथमिकवस्तुभि: सम्बद्धं वार्षिकं मुद्रास्फीति-मानं अपचीय जनवरीमासे चत्वारि दशमलव षड्नवमितं प्रतिशतं समागतम् अपरत्र, दिसम्बरमासे इदं हि षड् दशमलव शून्य द्विप्रतिशतं यावत् आसीत्।

**केन्द्रीयोपभोक्तृसंरक्षणम्**

केन्द्रीय-उपभोक्तृ-संरक्षण-प्राधिकरणेन सी.सी.पी.ए. इत्यनेन आई.आई.टी. जे.ई.ई. इत्येतस्या: परीक्षाया: परिणामस्य प्रसङ्गे भ्रामक-विज्ञापनस्य प्रसारणे आई.आई.टीयन्-संस्थाया: प्रशिक्षण केन्द्र प्राइवेट-लिमिटेड-इत्येतस्यै संस्थायै त्रिलक्षरुप्यकाणां दण्ड: आरोपित:। उपभोक्तृ-कार्य-मन्त्रालयेन सूचितं यत् उपभोक्तृ-संरक्षणाधिनियमस्य उपबन्धानाम् उल्लङ्घनं कुर्वतां वस्तूनां वा सेवानां वा किमपि असत्यम् अथ वा भ्रामकं विज्ञापनं न भवेदिति सुनिश्चितं कर्तुं निर्णय: विहित:। सी.सी.पी.ए. इति साम्प्रतं यावत् भ्रामकविज्ञापनानां प्रसारणाय विभिन्नेभ्य: अनुशिक्षण-संस्थानेभ्य: षड्चत्वारिंशत्-व्यपदेशान् प्रदत्तवान्। प्राधिकरणेन अनेन चतुर्विंशति-अनुशिक्षण संस्थानेषु सप्तसप्तलक्षाधिकरुप्यकाणाम् अर्थदण्ड: प्रसारित:। अपि च, भ्रामक-विज्ञापनानि समापयितुम आदेश: प्रदत्त:।

**राष्ट्रपति-कर्णाटकयात्रा :**

राष्ट्रपतिः द्रौपदीमुर्मू-वर्या अद्य कर्णाटकस्य यात्रायाम् अस्ति । मुर्मुवर्यया बेंगलुरु-नगरे आर्ट-ऑफ-लिविंग इत्यनेन आयोजितस्य दशमान्तराष्ट्रिय-महिला-सम्मेलनस्य उद्घाटनसत्रे भागः भजितः । अस्मिन् अवसरे राष्ट्रपतिवर्यया प्रोक्तं यत् प्रौद्योगिकप्रगत्याः वर्तमानयुगे अस्माभिः मानवीयमूल्यानां अक्षुण्णता सुनिश्चेतव्या । श्वः राष्ट्रपतिवर्या राँचिनगरे बीआईटी-मेसरा इत्यस्य सप्ततिवर्षपूर्त्यवसरस्य समारोहं संबोधयिष्यति ।

**अमितशाहः -आपराधिकविधयः**

केन्द्रीय-गृहमन्त्री अमितशाहः अद्य महाराष्ट्रस्य मुख्यमन्त्रिणा देवेंद्रफडणवीसः इत्यनेन सह राज्ये नवीनापराधिक-विधीनां कार्यान्वयनसस्य समीक्षायै एकस्य उपवेशनस्य अध्यक्षतां कृतवान् । एते नूतनाः आपराधिक-विधिनियमाः भारतीय-न्याय-संहिता, भारतीय-नागरिक-सुरक्षा-संहिता, भारतीय-साक्ष्य-अधिनियमः च सन्ति । उपवेशने महाराष्ट्रे आरक्षि-कारागार-न्यायालय-अभियोजन-अन्वीक्षण-सम्बद्धानां विभिन्ननूतन-नियमानां कार्यान्वयनस्य वर्तमान-स्थित्याः च समीक्षा क्रियते ।महाराष्ट्रस्य आरक्षि-महानिदेशिका रश्मि-शुक्ला अन्ये वरिष्ठाधिकारिणश्च उपवेशने भागं भजितवन्तः ।

**प्रधानमन्त्री-पुल्वामाक्रमणम्**

नवदशोत्तर-द्विसहस्रतमाब्दे जाते पुल्वामा-आक्रमणे दिवङ्गतान् सैनिकान् अद्य राष्ट्रम् स्मरति। अयं दिवसः जम्मू-कश्मीर्-राज्यस्य पुल्वामा-जनपदे,भीषणाक्रमणे सी.आर्.पी.एफ्.इत्यारक्षिबलस्य हुतात्मनां चत्वारिंशत् सैनिकानां संस्मरणे आक्रमणस्य षष्ठम-वर्षत्वेन आचर्यते। अस्मिन् आक्रमणे हुतात्मसैनिकेभ्यः प्रधानमन्त्रिणा नरेन्द्रमोदिना श्रद्धाञ्जलिः प्रदत्तः। सामाजिक-संदेश-माध्यमेन श्रीमोदि-वर्यः अकथत् यत् भारतीयाः तेषाम् हुतात्मसैनिकानाम् अविचल-समर्पणं कदापि न विस्मरिष्यन्ति । केन्द्रीयगृहमंत्री: अमितशाहः अपि पुल्वामा-आक्रमणस्य हुतात्म-सैनिकेभ्यः श्रद्धाञ्जलिमम् प्रायच्छत् । सामाजिक-संदेश-माध्यमेन श्रीशाहः अवदत् यत्, आतङ्कवादः सम्पूर्ण-मानव-सभ्यतायाः सर्वोत्तमः शत्रुः अस्ति, तं विरुद्ध्य च सम्पूर्णं विश्वम् एकीभूतम् अस्ति।

**महिला-क्रिकेटिति**

क्रिकेट्क्रीडायाम्, महिलाप्रीमीयरलीग-इत्येतस्या: स्पर्धाया: तृतीयं संस्करणम् अद्य समारभते। तावत् एतस्मिन् पञ्चदलानि सहभागितां करिष्यन्ति। प्रथमा प्रति स्पर्धा वडोदराया: कोताम्बीक्रीडाङ्गणे रॉयल-चैलेंजर्स बैंगलुरूदलस्य स्पर्धा गुजरात-जायन्ट्स्-दलेन सह सायंकाले सार्ध सप्तवादने भविष्यति।

**।। इति वार्ता:।।**